गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।सविता। त्रिष्टुप्।

**उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात्।**

**नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ॥ २.०३८.०१**

स्यः- सः। देवः सविता- सूर्य आत्मा। शश्वत्तमम्- सततम्। सवाय- प्रसवाय। तदपाः- तत्कर्मा। वह्निः- वोढा। अस्थात्- तिष्ठति। नूनम्- निश्चयेन। देवेभ्यः- देवताभ्यः। रत्नम्- रमणीयज्योतिः। वि- विशेषेण। धाति- ददाति। हि- खलु। अथ- अनन्तरम्। वीतिहोत्रम्- कान्तयज्ञं यजमानम्। स्वस्तौ- क्षेमे। अभजत्॥१॥

**विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति।**

**आपश्चिदस्य व्रत आ निमृग्रा अयं चिद्वातो रमते परिज्मन्॥ २.०३८.०२**

विश्वस्य- सर्वस्य। हि- खलु। श्रुष्टये- सुखाय। देवः- द्योतनशीलः सूर्यः। ऊर्ध्वः- उत्कृष्टः। पृथुपाणिः- बृहद्धस्तः। बाहवा- स्वबाहूपलक्षितरश्मीन्। प्र सिसर्ति- प्रसारयति। निमृग्राः- नितरां शोधयित्र्यः। आपः। अस्य- एतस्य सूर्यस्य। व्रते- नियत्यां तिष्ठन्ति। अयम्- एषः। वातः- वायुः। परिज्मन्- परितो व्याप्ते अन्तरिक्षे। रमते। आध्यात्मिके तु आत्मसूर्यश्चिद्रश्मीन् प्रसारयति। मूलशक्तिधारास्तस्य व्रते तिष्ठन्ति। प्राणः प्राणमयकोशे अनेनैव रमते॥२॥

**आशुभिश्चिद्यान्वि मुचाति नूनमरीरमदतमानं चिदेतोः।**

**अह्यर्षूणां चिन्न्ययाँ अविष्यामनु व्रतं सवितुर्मोक्यागात्॥ २.०३८.०३**

आशुभिः- शीघ्रगतिभिः। यान्- यान् गच्छन्। नूनम्- निश्चयेन। विमुचाति- सविता विमुच्यते। अतमानम्- गच्छन्तं तं जनम्। एतोः- गतेः। अरीरमत्- उपरमयति। अह्यर्षूणाम्- शत्रुं प्रति अभियातृणाम्। अविष्याम्- गमनेच्छानाम्। न्ययान्- नियन्त्री। मोकी- रात्रिश्च। सवितुः-

Dr. Rangaji
WEBOLIM

सूर्यस्य। व्रतम्- नियतिम्। अनु। आगात्- सरति। आत्मसूर्यो जीवस्य गतिनिरोधं करोति। मनुष्यप्रज्ञा च आत्मनियतिमनुसृत्यैव भवति ॥३ ॥

**पुनः समव्यद्विततं वयन्ती मध्या कर्तोर्न्यधाच्छक्म धीरः।**
**उत्संहायास्थाद्व्यृ१तूँरदर्धररमतिः सविता देव आगात्॥ २.०३८.०४**

पुनः- पुनः पुनः। विततम्- विस्तारभावनम्। वयन्ती- कुर्वती उषा ज्ञानोदयदेवता। समव्यत्- चेष्टयति। धीरः- धारणाकुशलः। शक्म कर्तोः- कर्तुं शक्यं कर्म। मध्या- तन्मध्ये। नि अधात्- निक्षिप्तवान्। स्वसाधनं विद्यायां निक्षिप्तवानिति भावः। संहाय- तमो विहाय। उत् अस्थात्- उदतिष्ठत्। अरमतिः- विरक्तः। देवः सविता- सूर्य आत्मा। ऋतून्- कालान्। अदर्धः- व्यभजत्। आगात्- आगच्छति ॥४ ॥

**नानौकांसि दुर्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः।**
**ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा॥ २.०३८.०५**

अग्नेः- पावकस्य। शोकः- तेजः। दुर्यः- गृह्यः। नानौकांसि- नानासदनानि। प्रभवः- प्रकर्षसत्ताकः सन्। वि- विशेषेण। तिष्ठते- तिष्ठति। विश्वमायुः- यजमानस्य सर्वं जीवनमधितिष्ठति। सूनवे- स्वतनयायाग्नये। माता- अदितिः। ज्येष्ठम्- प्रथमम्। भागम्। सवित्रा- आत्मना। इषितम्- प्रेरिताम्। अस्य- एतस्याग्नेः। केतम्- प्रज्ञाम्। अनु। आधात्- दधौ ॥५॥

**समाववर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरताममाभूत्।**
**शश्वाँ अपो विकृतं हित्व्यागादनु व्रतं सवितुर्दैव्यस्य॥ २.०३८.०६**

जिगीषुः- आवरणविजिगीषुरग्निः। विष्ठितः- चित्तवृत्तीर्निरुद्ध्य। समाववर्ति- पुनरात्मानं स्वमूलं समावर्तते। विश्वेषाम्- सर्वजगताम्। कामः- क्रतुरूपेण स्थितः। चरताम्- सर्वेषां जीवानाम्। अमा- शरण्यः। अमाशब्दो गृहनामसु पठितः। अभूत्- अभवत्। दैव्यस्य सवितुः-

Dr. Rangaji
WEBOLIM

सूर्यस्यात्मनः। व्रतम्- नियतिम्। अनु। शश्वान्- नित्योग्निः। विकृतम्- अधर्मम्। अपः- कर्म। हित्वी- हित्वा। अगात्- स्वमूलं जगाम ॥६॥

**त्वया हितमप्यमप्सु भागं धन्वान्वा मृगयसो वि तस्थुः।**
**वनानि विभ्यो नकिरस्य तानि व्रता देवस्य सवितुर्मिनन्ति॥ २.०३८.०७**

अप्सु- अन्तरिक्षे। त्वया- भवता। हितम्- निहितम्। अप्यं भागम्- जलभागम्। धन्व- मरुदेशे। मृगयासः- मृगयमाणाः। त्वत्प्रसादेन। वि तस्थुः- विशेषेण तिष्ठन्ति। अनु- अनुलभन्ते। विभ्यः- पक्षिभ्यः। वनानि- अरण्यानि दत्तानि। अस्य- एतस्य। देवस्य सवितुः- सूर्यस्य। तानि- अमूनि। व्रता- व्रतानि। नकिः मिनन्ति- न हिंसन्ति ॥७॥

**याद्राध्यं१ वरुणो योनिमप्यमनिशितं निमिषि जर्भुराणः।**
**विश्वो मार्ताण्डो व्रजमा पशुर्गात्स्थशो जन्मानि सविता व्याकः॥ २.०३८.०८**

जर्भुराणः- सरन्। वरुणः- वरणीयः सूर्यः। निमिषि- क्षणेन। याद्राध्याम्- यातां गच्छतां संराध्यम्। अप्यम्- आप्तुं योग्यम्। अनिशितम्- अतीक्ष्णं मृदुम्। योनिम्- सदनम्। यच्छति। विश्वः- सर्वः। मार्ताण्डः- सूर्य आत्मा। पशुः- जीवः। पश्यतीति पशुर्द्रष्टा जीवः। व्रजम्- स्वात्मानमेव स्वचिद्रश्मिभिः। आगात्। प्रभाते तु। सविता- आत्मा प्रेरकः। जन्मानि- जीवान्। स्थशः- स्थाने स्थाने। व्याकः- पृथक्करोति। स्वापे चित्किरणैरात्मन्येव एकीभूयानन्तरं जाग्रति चित्किरणान् स्वात्मन एव प्रकटयतीति भावः ॥८॥

**न यस्येन्द्रो वरुणो न मित्रो व्रतमर्यमा न मिनन्ति रुद्रः।**
**नारातयस्तमिदं स्वस्ति हुवे देवं सवितारं नमोभिः॥ २.०३८.०९**

Dr. Ranganji

WEBOLIM

यस्य। व्रतम्- धर्मं नियतिम्। इन्द्रो वरुणोऽर्यमा रुद्रः- एते देवाः। न मिनन्ति- न हिंसन्ति। नारातयः- शत्रवो न हिंसन्ति। तं देवं सवितारम्। स्वस्ति- क्षेमाय। नमोभिः- वन्दनैः। हुवे- आह्वये ॥९॥

**भगं धियं वाजयन्तः पुरंधिं नराशंसो ग्नास्पतिर्नो अव्याः।**
**आये वामस्य संगथे रयीणां प्रिया देवस्य सवितुः स्याम॥ २.०३८.१०**

भगम्- सौभाग्यमयीम्। पुरन्धिम्- बहुधारणावतीम्। धियम्- बुद्धिम्। वाजयन्तः- वीर्ययुक्तां कुर्वतः। नः- अस्मान्। ग्नास्पतिः- मन्त्रपालकः। नराशंसः- नरस्तुतः। अव्याः- रक्षतु। वामस्य- कल्याणस्य। आये- आगमने। रयीणाम्- दानयोग्यधनानाम्। सङ्गथे- सङ्गमने। देवस्य सवितुः- सूर्यदेवस्य। प्रियाः। स्याम- भवेम ॥१०॥

**अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आ गात्।**
**शं यत्स्तोतृभ्य आपये भवात्युरुशंसाय सवितर्जरित्रे॥ २.०३८.११**

सवितः। त्वया- भवता। दत्तम्। काम्यम्। राधः- धनम्। अस्मभ्यम्- नः। दिवः- नभसः। अद्भ्यः- उदकात्। पृथिव्याः- भूम्याः। आ गात्- आगच्छतु। स्तोतृभ्यः- मन्त्रविदाम्। आपये- बन्धवे। उरुशंसाय- प्रभूतमन्त्रयुक्ताय। जरित्रे- मन्त्रविदे। शम्- मङ्गळम्। भवाति- भवति ॥११॥

Dr. Rangaji

WEBOLIM